শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী রঙ্গনাথ মঙ্গলম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী রঙ্গনাথ মঙ্গলম্ ॥

মঙ্গলং রঙ্গনাথায মম নাথায মঙ্গলম্।
মঙ্গলং লোকনাথায লক্ষ্মীনাথায মঙ্গলম্॥ **1** ॥

লক্ষ্মীচরণলাক্ষাঙ্গ সাক্ষি শ্রীৱৎসৱক্ষসে।
ক্ষেমঙ্করায সর্ৱেষাং শ্রীরঙ্গেশায মঙ্গলম্॥ **2** ॥

সৈকতে সহ্যকন্যাযাস্তরঙ্গানিৱ শীতলে।
অতিরঙ্গং ভুজঙ্গেন্দ্রে সুখসুপ্তায মঙ্গলম্॥ **3** ॥

রজতাদ্রিনিষণ্ণেন্দ্রনীলশৈলানুকারিণে।
শেষে শযায শ্যামায শ্রীরঙ্গেশায মঙ্গলম্॥ **4** ॥

বাহুমেকং প্রসার্যান্যং উপদাযাতি পন্নগম্।
নিদ্রাণায জগদ্রক্ষাজাগরূকায মঙ্গলম্॥ **5** ॥

পরিষ্কৃতাসনাম্ভোজপরস্পরতলাঙ্ঘ্রযে।
স্ফুরৎপীতাম্বরাযাস্তু শ্রীরঙ্গেশায মঙ্গলম্॥ **6** ॥

দর্শিতাভযমুদ্রায ভক্তানাং তদ্ৱিরোধিনাম্।
দীপ্তদিৱ্যাযুধাযাস্তু শ্রীরঙ্গেশায মঙ্গলম্॥ **7** ॥

সুস্মিতায সুনাসায সুদৃশে সুন্দরভ্রুৱে।
সুললাটকিরীটায শ্রীরঙ্গেশায মঙ্গলম্॥ **8** ॥

তরঙ্গিতদযৈর্ৱিশ্ৱং অপাঙ্গৈরভিষিঞ্চতে।
সম্রাজে সর্ৱলোকানাং শ্রীরঙ্গেশায মঙ্গলম্॥ **9** ॥

ইক্ষ্ৱাকোর্ৱিধিলব্ধায ৱিভীষণকৃতে পুনঃ।
ৱিস্রাণিতায রামেণ শ্রীরঙ্গেশায মঙ্গলম্॥ **10**॥

জ্ঞানসিদ্ধাঞ্জনেনাস্মদ্দেশিকৈর্দর্শিতায মে।
নিত্যে নিত্যপূর্ণায শ্রীরঙ্গেশায মঙ্গলম্॥ **11**॥

মঙ্গলাশাসনপরৈর্মদাচার্যপুরোগমৈঃ।
সর্ৱৈশ্চ পূর্ৱৈরাচার্যৈঃ সৎকৃতাযাস্তু মঙ্গলম্॥ **12**॥

॥ শ্রী রঙ্গনাথ মঙ্গলং সমাপ্তম্॥